IJRAR.ORG E-ISSN: 2348-1269, P-ISSN: 2349-5138

INTERNATIONAL JOURNAL OF RESEARCH AND ANALYTICAL REVIEWS (IJRAR) | IJRAR.ORG

An International Open Access, Peer-reviewed, Refereed Journal

# शिक्षकाणां शैक्षिकतत्त्वानुशीलनम्

**डॉ. ललित कुमार झाः**

**भूतपूर्व सहायक प्राध्यापकः**

**बी.एड. प्रभागः, फारबिसगंज कॉलेज,**

**फारबिसगंज, अररिया।**

कस्यामपि वेलायां श्रेयसी शिक्षणादिपद्धतिः नितान्तं परमावश्यकी वरीवर्तीति। तामन्तरापठनपाठनं नैव विद्यते। तत्र मूलतत्त्वं शिक्षणमेवाऽऽस्ते। शैक्षिकतत्त्वप्रतिपत्त्यर्थं तदेवावश्यकं प्रतिभाति। नहि मूलमन्तरा नितरामेधते नितान्तं शाखाविकाशः। तदुपपत्तये तस्यैवावश्यकत्वं निश्चिनुते विदुषां समवायः।

एतावता विज्ञायते तद्विकाशाय परमावश्यकी परिष्कृता शिक्षणपद्धतिः। सुसंस्कृतशैक्षणिकवृतस्य विकाशाय शिक्षकाणां रमणीया भूमिका समादरणीया सज्जायते। तदनन्तरमेव शैक्षिकवृत्तिः सफलत्वमाकलयेत्।

हेतुनाऽमुना सफलप्रयासो भविता शैक्षणिक व्यापारो शिक्षकस्य। आभ्यां व्यापाराभ्यां सफलत्वमासादयेदिति विज्ञायते विदुषा। तद्यथा-[1]

**"वक्तुरेव हि तज्जाड्यं श्रोता यत्र न बुध्यते।"**

शिक्षकाणां सफलकामाय श्रेयसी शैक्षणिकवृत्तिः सर्वदानुकर्तव्या शैक्षणिकवृत्यनुशीलवता विदुषा। तदनन्तरमेव सफलः प्रयासो निश्चतव्यः शैक्षणिक व्यापारवता विदुषा।

शैक्षिकतत्त्वानुशीलनवतां धीमतां ये गुणाः सर्वदा अपेक्षन्ते त एव शैक्षिक व्यापारे शिक्षार्थिनः चेतांसि समाकर्षन्ति। सत्यमेतत् समेषां वचनं प्राज्ञिक मानस-मन्दिरे प्रत्यजं रमते। छात्राणां शान्तस्वान्तानि विकसितुं प्रतिपलं तादृश प्रतिभावैलक्षण्-यमाकाङ्क्षते। शिक्षणचातुर्य समाकलितानां प्रतिभाविभाविभासितानां शिक्षकाणां व्युत्पत्तिवैशद्यं तदुत्कर्षाधायकत्वेन वैशिष्ट्यं समुल्लासयति।

तावदिदमेव विकासमूलं समेषां कृते समुचितमाभाति। तथा **चोक्तं नीति साहित्ये-**[2]

**विधिसमयनियोगः गुणचरितविशेषः ।**

**नव्यतामादधातीति सतां संशोभते मनः ॥**

**छात्राणां गुणोत्कर्षत्वम्** -

गुरुदोषावरणपूर्वकत्वे सति तन्निष्ठ गुणविशिष्टत्वमेव गुरुत्वम्। अस्तु, तत्रास्मकं विप्रतिपत्तिलेशः समुपसर्पति। वास्तविकं त्वित्त्वं प्रतिभाति यत्-

गुरुपदपद्मगुणसमागतनैसर्गिकविचारप्रवाहं समुपसृत्य तत्प्रदर्शितपथेन शास्त्रकौशलं संस्कृतप्रवाहे वितन्य तादृशगुण-गौरवसमर्पितधिया तेषां यशोलतिकां समाजे सदा प्रसरत्येवेति निश्चप्रचम्। तदेव छात्रत्वं नितान्तमनुसर्तव्यं समैः सद्भिः।

स एव गुरुछात्रयोः तात्त्विकः सम्बन्धः लोचनगोचरायते। तादृश सम्बन्धस्यैव लौकिक मर्यादायां नितरामादर्शमूलकत्वं स्वीकुर्वते विदुषां विचारप्रवाहपङ्क्तयः। किं बहुना तेषां विचारकीर्तिकौमुदी न केवलं प्राज्ञिकानां समाजे नवां पद्धतिं वितनोति किञ्च शास्त्रीयविचारमर्यादां शाश्वतिकत्वेन प्रदर्शयति मनीषिणां भावनातरङ्गः।

अनेनैव समुत्थित मानसिकप्रवाह झञ्झावातः समालोचकानां हृदयाम्बरे जागर्ति। कियन्मात्रं साफल्यमाकलयेदिति पाठकानां वितर्कः। तद्यथा-विचारपक्षमिमं दृढीकुरुते प्रज्ञवर्याणां नैसर्गिकः सम्वादः।

छात्राणां वैचारिकप्रवाहसम्बन्धस्य दार्ढ्यतया नैरन्तर्यमाकलय्य स्वस्य श्रेयो मार्गः सद्भि सततमनुकर्तव्यः । तदनन्तरमेव कल्याणं प्राप्येत। अन्यथा विपरीतो मार्गः समागच्छेत् समेषां बुद्धिमतां विचाराग्रे ध्वान्तक्लान्तस्यैव पन्थाः सर्वदानुसन्धातव्य एवेति तत्त्वविदां विचारपद्धतिः। अतएवोक्तिः विद्यते सर्वेषां यत्-[3]

**"कालः करालचरितः कवलीकृत्य भव्यताम्।**

**नव्यतामादधतीति सतां चेस्विद्यते मनः ॥"**

**पाठ्यक्रमः-**

अन्तेवासिनां बौद्धिकप्रतिभां पर्यालोच्य तद्नुसारं विद्वद्भिः निर्द्धारयितव्यः पाठ्यक्रमः। अन्यथा विपरीतां गतिं समवेक्ष्य वैफल्यमेव प्राप्नुयादिति ममेयं मनीषा सन्तिष्ठते। अधुना काले कालकवलिता सुरभारती वरीवर्तीति । विदाङ्कुर्वन्त्येव समेविद्वांसः वस्तुतत्त्वमिदम् ।

यद्यपि संस्कृतसाहित्यस्य पुरातनवैभवं लोचनगोचरीकृत्य तदनुसारं पाठ्यक्रमं निर्मातुं यतिष्यन्ते चेत् कां गतिं प्राप्नुयात् गीर्वाणगवी। अमुया कालक्रममर्यादया प्रतिभाभास्वरमासितानां धीधनेशानां नितरां वास्तविकत्वं 'समीक्ष्य' तदनन्तरमेव सुरभारतीविकाशाय विधेयाप्रवृत्तिः मनीषिणा। तेनैव निर्मित पाठ्यक्रमः सफलत्वं प्राप्येत। अतएव पूर्वापरसन्दर्भसौन्दर्यमाकलय्य छात्राणां बौद्धिकविकाशमञ्जरीं दरीदृश्य पाठ्यक्रमं निर्मातुं यतितव्यः मनीषिणा। तथात्वे प्रणीत पाठ्यक्रमः साफल्यमाकलेयदिति ममेयं मतिः। अन्यथा गम्भीरगभीरविचारलता प्रतानस्याऽऽर्थसमाज समापन्नत्वेन प्रतिदिनं संस्कृतदिवस सुप्रभातस्य तमसाछन्नत्वमेव प्रतीयेत। तद्यथा चोक्तमाचार्यचरणैः [4]

**"वयमिह पदविद्यां तर्कमान्वीक्षिकीं वा**

**पथि विपथे वा वर्तयामः सपन्थाः।**

**उदयतिदिशिभानौ भानुमान् सैवपूर्वा-**

**नहि तरणिरन्दीते दिक् पराधीनवृत्तिः ।।"**

एभिर्वाक्यकदम्बैः विज्ञायते किल अन्तेवासिनां प्रज्ञावृत्तिं समवेक्ष्य कल्पना कुसुमदिवाकरेण मनीषिणा पूर्वापरसन्दर्भावलीं ध्यायं ध्यायं तादृशः पाठ्यक्रमो निर्मातव्यः, येनान्तेवासिना कोमलमतिना सर्वदाध्ययने नितान्तमभिरुचिः समुत्पद्येत। व्याकरणशास्त्रस्य विविधशास्त्रेभ्यः कीदृशः सम्बन्धः। तद्यथा-[5]

**"यो वेदवेदवदनं सदनं हि सम्यक्, ब्रा**

**ह्ययाः सवेदमपि वेद किमन्यशास्त्रम् ।**

**तस्मादतो प्रथममेतदधीत्य विद्वान्-**

**शास्त्रान्तरस्य भवति श्रवणेऽधिकारी ॥"**

एवमेव "मुखं व्याकरणं प्रोक्तमि "त्यादि वचनकदम्बैः विज्ञायतेऽस्माभिः यत् समेषु वेदाङ्गेषु व्याकरणशास्त्रस्य प्राधान्यमौत्सर्गिकमेवेति सत्यमाभाति। वास्तविकीयं वार्ता वरीवर्तीति प्रमाणप्रत्ययाभ्यां सिद्धमेवेति निश्चयं प्रत्येमि।

समस्तेषु संस्कृतसाहित्येषु वेदाङ्गेषु च साक्षात् परम्परया वा शब्दशास्त्रस्य परमावश्यकत्वं विज्ञायते तत्त्वविदा प्राज्ञिकेन। हेतुनाऽमुना निश्चीयते यत् वेदाङ्गमूलकत्वेन समस्तशास्त्रेण सह शब्दशास्त्रस्य सम्बन्धः शाश्वतिकः प्रतीतिप्रत्ययेन विज्ञातव्यः प्रतिभाभासितेन मनीषिणा। तत्त्वमिदं परीक्ष्य दरीदृश्य च महर्षिणा महाभाष्यकारेण पतञ्जलिना नैरपेक्ष्येण प्रत्यजादिवचनमिदम्। तथा च "रक्षोहागमलघ्वसन्देहाः प्रयोजनमि' 'ति । नात्र केषां वैमत्यमिति प्रतिपद्यते।

भट्टिकाव्येऽपि दृश्यते न व्याकरणं विना काव्यं विराजते। एवं समस्तं संस्कृतवाङ्मयं नैव शोभते विना व्याकरणम्। दर्शनशास्त्रेष्वपि च शब्दशास्त्रेण स्वाभाविकः सम्बन्धः वैज्ञानिक एवेति । नात्र केषां विवादावसरः समुपसर्पति। ज्यौतिषशास्त्रमपि व्याकरणमन्तरा किमपि कर्तुं नैव क्षमते। प्रोक्तं यत् भास्कराचार्येणापि न्यगादिवचनं किल वसन्तवर्णनप्रसंगे सिद्धान्तशिरोमणौ -"[7]

**"उत्फुल्लं नवमल्लिकापरिमलं भ्रान्तभ्रमद्भ्रामरे-रे**

**पान्थाः कथमव्यभानि भवतां चेतांसि चैत्रोत्सवे ।**

**मन्दान्दोलित चूतनूतन घनस्फारत् स्फुरत्पल्लवै-रु**

**दवेलन् नववल्लरीष्वितिलपन्त्युचैकलं कोकिलाः ॥"**

एतावता पद्येनानेनावगम्यते यत् समस्तशास्त्रेण सह नैसर्गिकः सम्बन्धस्तु विद्यत एवेति प्रतीयते। न्यायदर्शनेष्वपि च समवलोक्यते सम्बन्धः यत् अभ्यधायि श्रीमताऽऽचार्येण स्वप्रबन्धे-[8]

**"येषां कोमल काव्यकौशलकला लीलायते भारती-**

**तेषां कर्कशतर्कवक्रवचनोद्गारेऽपि किं हीयते। यैः**

**कान्ताकुचमण्डलेकररुहाः सानन्दमारोपिताः**

**तैः किं मत्तकरिन्दकुम्भशिखरे नारोपणीयाः शराः।।"**

एतेन कि विज्ञायते सर्वेषां शास्त्राणां व्याकरणशास्त्रेण सह सम्बन्धः स्वाभाविक एवेति विदुषां विचार सरणिः। तद्यथा-[9]

**परस्परं चाधिकमेव सर्वं दृष्ट्ा मुदा स्नेहरसेन धीमन् ।**

**तत्त्वं विलोक्य सततं च सर्वं धीमन् तथा च भुवि भासमानम् ॥**

**सन्दर्भाः**

1. सुभाषितम् ।

2. नीतिसाहित्यम्-भूमिका।

3. सुभाषित वचनानि।

4. न्यायकुसुमाञ्जलिः - भूमिका ।

5. सिद्धान्तशिरोमणिः गोलप्रशंसाध्यायः - 2

6. महाभाष्यम् - पस्पशाह्निकम्

7. सिद्धान्तशिरोमणिः गोलप्रशंसाध्यायः ऋतुवर्णनम् - 1

8. प्रबन्धचिन्तामणिः - भूमिका।